.. શિવ સુપ્રભાતમ ..

સ્નાત્વાજલે શીતલિતાન્તરઙ્ગાઃ
 સ્પૃષ્ટ્વાચા પુષ્પાણિસુવાસિતાઙ્ગાઃ .
દ્વિજન્તિ પ્રભાત્ત મરુત્તરઙ્ગાઃ
 ઉત્તિષ્ઠશમ્ભો તવ સુપ્રભાતમ્ ..
નન્દીશ્વરાંભાનિનદંમનોજ્ઞં
 વર્શાબ્દગજર્યાં ઇવ મન્ય માનઃ .
કેકીકુમારસ્ય કરોતિડમૃતં
 ઉત્તિષ્ઠશમ્ભો તવ સુપ્રભાતમ્ ..
લોકૈકબન્ધું પ્રસવિશ્યતીતિ
 પ્રાચીંસમર્ચ્યાન્જલિબદ્ધ હ્સ્તૈઃ .
સ્તોતું ભવન્તં મુનયઃ પ્રવૃત્તાઃ
 ઉત્તિષ્ઠશમ્ભો તવ સુપ્રભાતમ્ ..
બ્રહ્માદિદેવોદિત વેદ મન્ત્રૈઃ
 દિગ્પાલભૂષા મણિરાણિનાદૈઃ .
કોલાહ્લોદ્ધારિચ સંપ્રભૂતઃ
 ઉત્તિષ્ઠશમ્ભો તવ સુપ્રભાતમ્ ..
આભાતિશૈલોપરિલમ્બમાના
 મેધાલિરેષાગજચર્મનીલા .
નિત્યેવશાટીહ્રિનાત્વદર્થં
 ઉત્તિષ્ઠશમ્ભો તવ સુપ્રભાતમ્ ..
પ્રાચ્યાસમન્તાત્ પ્રવિકીર્યમાણૈઃ
 લિપ્તોત્યલોકઃ શિતકાન્તિપુજૈઃ .
ધત્તેત્વદીયાં રુચિરાઙ્ગશોભાં
 ઉત્તિષ્ઠશમ્ભો તવ સુપ્રભાતમ્ ..